काव्यमाला. ५४.



श्रीकाञ्चनाचार्यविरचितो

# धनंजयविजयः ।

श्रीमदाचार्याभिनवगुप्तविरचितया व्याख्ययानुगतः ।



मूल्यं २ आणकाः ।

**KĀVYAMĀLĀ. 54.**



# THE DHANAÑJAYAVIJAYA
## OF
# KĀÑCHANĀCHĀRYA.



EDITED BY
PAṆḌIT ŚIVADATTA
Head Paṇḍit and Superintendent, Sanskṛit Department,
Oriental College, Lahore
AND
KĀŚINĀTH PĀṆḌURANG PARAB.

Third Edition.

PUBLISHED BY
PĀṆḌURAÑG JĀWAJĪ,
PROPRIETOR, 'NIRṆAYA SĀGAR' PRESS,
BOMBAY.

1939.

*Price 3 Annas.*

Publisher:-Pandurang Jawaji, } Nirnaya-Sagar Press,
Printer:-Ramchandra Yesu Shedge, } 26-28, Kolbhat Street, Bombay.

काव्यमाला. ५४.

श्रीकाञ्चनाचार्यविरचितो

# धनंजयविजयः ।

जयपुरमहाराजाश्रितमहामहोपाध्यायपण्डितदुर्गाप्रसाददारक-
केदारनाथकृपाङ्गीकृतशोधनकर्मणा शिवदत्तशर्मणा,
मुम्बापुरवासिपरबोपाह्वपाण्डुरङ्गात्मजकाशीनाथ-
शर्मणा च संशोधितः ।

तृतीयं संस्करणम् ।

स च

मुम्बय्यां

पाण्डुरङ्ग जावजी इत्येतैः,

स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये मुद्रयित्वा प्राकाश्यं नीतः ।

शाकः १८६१, खिस्ताब्दः १९३९

मूल्यं ३ आणकाः ।

# काव्यमाला।

## श्रीकाञ्चनाचार्यविरचितो

## धनंजयविजयः।

हरेर्लीलावराहस्य दंष्ट्रादण्डः स पातु वः।
हेमाद्रिकलशा यत्र धात्री छत्रश्रियं दधौ ॥ १ ॥

अपि च,

तद्वः प्रमार्ष्टु विपदः प्रणतार्तिहन्त्र्या
न्यस्तं पदं महिषमूर्धनि चण्डिकायाः।
वैरी यदीयनखरांशुपरीतशृङ्गः
शक्रायुधाङ्कितनवाम्बुधरप्रभोऽभूत् ॥ २ ॥

अपि च,

तद्वः सारस्वतं चक्षुः समुन्मीलतु सर्वदा।
यत्र सिद्धाञ्जनायन्ते गुरुपादाब्जरेणवः ॥ ३ ॥

(नान्द्यन्ते)

सूत्रधारः—(समन्तादवलोक्य।) अहो रमणीयता प्रभातस्य! ।

तथा हि—

दाराणां मुरवैरिणो रतिपतेर्मातुस्त्रिलोकीजितः
स्फारत्पङ्कजकोटरोदरजुषो निद्राविरामे श्रियः।
प्रत्युद्बुद्धमरालपक्षपटहध्वानप्रबन्धानुगं
भृङ्गी मङ्गलगाथिकेव सततं प्रोत्कूजति प्राङ्गणे ॥ ४ ॥

(पुनः परितोऽवलोक्य ।) अहो रमणीयः शरदारम्भः! । यतः—

........................................

सरो हरति मे चेतः प्रोन्मूर्च्छत्पद्मकुड्मलम् ॥ ५ ॥

अपि च,

निष्कम्पा पृथिवी सशाद्वललता निर्दुर्दिनं चाम्बरं
सुव्यक्तामलतारकेन्दु सरितः काशप्रसूनाङ्किताः ।
तोयं वीतविषं सरांसि विकसत्पद्मानि शुभ्रा दिशो
द्रष्टुं संप्रति शारदीं श्रियमिमां मन्ये प्रबुद्धो हरिः ॥ ६ ॥

(नेपथ्याभिमुखमवलोक्य ।) क एष लिखितहस्तः समायाति ।

(ततः प्रविश्य पुरुषो लिखितमर्पयति ।)

**सूत्रधारः**—(विमृश्य, वाचयति ।) अस्ति प्रशस्तिसहितः श्रीमाञ्जयदेवः ।

अर्थिप्रत्यर्थिलक्षेष्वप्यपराङ्मुखचेतसम् ।
यं पराङ्मुखतां निन्युः केवलं परयोषितः ॥ ७ ॥
यस्य चेतसि निर्व्याजं द्वयं तूलकणायते ।
क्रोधे विरोधिनां सैन्यं प्रसादे कनकोच्चयः ॥ ८ ॥

स च प्रसादेन रङ्गमण्डनं नाम नटं समादिशति—

इह शरदि विराजद्वारिजोत्तंसितायां
प्रथमविगतनिद्रः श्रीकराश्लिष्टवक्षाः ।
शिथिलयति मुरारिर्योगनिद्रानुरागं
तदयमखिललोकस्योत्सवः किं पुनर्नः ॥ ९ ॥

तदिदानीं भवता वीरसाद्भुतं रूपकमभिनीय गदाधरप्रमुखासत्परिषदा-

नन्दनीया इति । किं नाम तादृशं रूपकम् ? । (स्मृत्वा ।) आः, ज्ञातम् ।

कुलं कविमुनेरस्ति पुत्रान्यत्र सरस्वती ।
संशिक्षयत्ति धात्रीव नितान्तं मधुरां गिरम् ॥ १० ॥
तत्राभवदुपाध्यायो नारायणसमाह्वयः ।
जितवादिसहस्रौघः प्राप वादीश्वराभिधाम् ॥ ११ ॥

अपि च,

कृतसंन्यसनात्प्रयच्छतोऽप्यभयं भूतगणाय योगिनः ।
निजमण्डलभेदशङ्किनो भयमेकस्य रवेरभूद्यतः ॥ १२ ॥
तत्सूनुः काञ्चनो नाम समस्तगुणवल्लभः ।
गोष्ठीशालेव विद्यानां यस्य जिह्वा विराजते ॥ १३ ॥

तेन कृतो धनंजयविजयो नाम व्यायोगोऽभिनेतव्यः। (नेपथ्याभिमुखमवलोक्य ।) कः कोऽत्र भोः ।

(प्रविश्य ।)

**पारिपार्श्विकः**—भाव, को णिओओ ? । (क)

**सूत्रधारः**—आहूयतां धनंजयविजयाभिनयकुशलो नटवर्गः ।

**पारिपार्श्विकः**—तह । (इत्युक्त्वा निष्क्रान्तः ।) (ख)

**सूत्रधारः**—(प्राचीमवलोक्य स्मित्वा ।)

चिरमज्ञातः समयवशात्कोऽपि तेजसो निचयः ।
प्रकटीभवति विवस्वानेष किरीटीव समयमुत्तीर्णः ॥ १४ ॥

---

(क) भाव, को नियोगः ? ।

(ख) तथा ।

(ततः प्रविशति विराटामात्येन सहार्जुनः ।)

**अर्जुनः**—(सोत्साहम् ।) अनुकूलं दैवं लक्ष्यते । यतः—

या लतान्विष्यते सैव लग्ना संप्रति पादयोः ।
कुरुराजोऽभियातव्यः स्वयमेव समागतः ॥ १५ ॥

**सूत्रधारः**—(सहर्षमवलोक्य ।) अये, परिगृहीतार्जुनवेषः श्यामलकः प्रवृत्तः । तदहं पात्रान्तराणि प्रगुणयामि ।

(इति निष्क्रान्तः ।)

**इति प्रस्तावना ।**

**नायकः**—(सहर्षम् ।)

गोरक्षणं सकलशात्रवमानभङ्ग-
स्तोषो विराटनृपतेरुपकारिणश्च ।
पर्याप्तमेकमपि यत्समरोत्सवाय
सर्वं तथा मिलितमत्र ममैव भाग्यैः ॥ १६ ॥

**अपि च,**

सा मनोरथसंपत्तिः स एव हि महोत्सवः ।
निर्वापयन्ति यद्वैरं परिपन्थिषु मानिनः ॥ १७ ॥

**अमात्यः**—देव, नेयं सङ्ग्रामस्य भूमिः ।

निर्दग्धकालकेयस्य निवातकवचद्विषः ।
कौरवास्ते कियन्मात्रं रणाराधितशूलिनः ॥ १८ ॥

**नायकः**—साधु सुयोधन, साधु ।

यत्पूर्वजैरधिगतं भुजविक्रमेण
तत्प्राप्य राज्यमखिलं कपटाक्षवृत्त्या ।

गाः सांप्रतं हरसि भिल्ल इव त्वयाद्य
सापत्रपः कुलगुरुर्विहितो विधुर्नः ॥ १९ ॥

**अमात्यः**—देव,

सुयोधनचरित्रेण शशिनोऽवनतं शिरः ।
चरित्राणि तवैवाद्य कुर्वन्तु परमोन्नतम् ॥ २० ॥

**नायकः**—(विचिन्त्य ।) कथमयं नगरसमीपे क्षिप्तसमरोपकरणानयनाय प्रहितः प्रतिपन्नसारथ्यश्चिरयति कुमारः ।

(ततः प्रविशति विराटकुमारः ।)

**कुमारः**—देव, अनुष्ठितस्तवादेशः । तदारोहत्वायुष्मान् ।

(नायकः कृतसंनाहो रथमारोहति ।)

**अमात्यः**—(सविस्मयं नायकमवलोक्य ।)

विरचितसमरोचिताङ्गभूषः परिहितभूषितवेष एष भाति ।
जलधरनिकरोपरोधशून्यो रविरिव राजसुतः शरत्प्रचण्डः ॥२१॥

(पुनर्निपुणमवलोक्य ।)

हेषन्ते यज्जितजलधरध्वानमेते तुरङ्गा
भूमिं पादैर्यदपि च मुहुर्दक्षिणैरालिखन्ति ।
यानौत्सुक्यं यदपि चलनाद्वालधेर्व्यञ्जयन्ति
त्वद्दोर्दण्डद्वितयवशगा तत्समग्रा जयश्रीः ॥ २२ ॥

**नायकः**—अमात्य, वयमिदानीं गाः प्रत्यानेतुं प्रस्थिताः स्मः । त्वं गोहरणोद्विग्नं पौरजनं समाश्वासय ।

**अमात्यः**—यदादिशति देवस्तथा करोमि । (इति निष्क्रान्तः ।)

**नायकः**—(कुमारं प्रति ।) यावन्मागमन्दूरे गावस्तावन्नोदयाश्वान् ।

(कुमारस्तथा करोति ।)

**नायकः**—(रथवेगं निरूप्य ।)

आलिङ्गन्तो वसुधां निजखुरदलितामिवानुनेतुममी ।
वदनविगतचरणा इव संलक्ष्यन्ते जवादश्वाः ॥ २३ ॥

अपि च,

विच्छिन्ना रथचक्रपद्धतिरियं हेलावृतैर्वाजिना-
मायान्तीव जवेन संमुखममी मार्गस्थिताः शाखिनः ।
खेदं पादतलाहतेरिव पुरो गन्तुं गतो नेहते
वाहानामनुकूलमारुतभरोद्धूतोऽपि धूलिव्रजः ॥ २४ ॥

(नेपथ्याभिमुखमवलोक्य ।) रे रे गोपालाः, अलं विषादेन । तथा हि—

सिञ्चन्तः करुणारसेन हृदयं यावन्न वत्सा अमी
मातुर्मार्गविलोकनव्यसनिनो मुञ्चन्ति हम्बारवान् ।
याचन्ते नहि यावदेव शिशवः पातुं पयो नोत्सुका-
स्तावद्गाव इहेत्यवेत भवतां चेतोज्वरः शाम्यतु ॥ २५ ॥

(नेपथ्ये ।)

महाप्पसाओ । (क)

**कुमारः**—आयुष्मन्, नूनमदूरे कुरुबलम् । यतः—

वाजिव्राजखुराभिघातदलितक्षोणीरजोभिः पुरः
सान्द्रैर्जीर्णकपोतकण्ठरुचिभिर्व्योमेदमास्तीर्यते ।
किं वाक्येन करीन्द्रगण्डविगलद्दानाम्बुधारागणा-
भोगं संप्रथयन्त्यमी परिमलप्रोद्गारिमन्दानिलाः ॥ २६ ॥

---

(क) महाप्रसादः ।

**नायकः**—सुव्यक्तं कुरुबलम् । तथा हि—

व्याधूतचामरमुदस्तसितातपत्र-
मुत्क्षिप्तकुन्तभयविद्रुतपत्रिचक्रम् ।
एतद्बलं कुरुपतेर्भरपूर्यमाण-
शङ्खध्वनित्रसदरण्यमृगं पुरस्तात् ॥ २७ ॥

(बाहू प्रति सोत्साहम् ।)

कान्तारक्षितिषूपधानविषये यद्धूलिभिर्धूसरौ
पाञ्चालीपरिरम्भनिर्भररसास्वादेऽपि यद्वञ्चितौ ।
यत्कान्ताजनयोग्यदन्तवलयैरावेष्टितौ निस्त्रपं
तद्बाहू स्मरतं चिराय पुरतस्तिष्ठन्त्यमी वैरिणः ॥ २८ ॥

(नेपथ्ये ।)

धृतधनुरिव दर्पः साहसस्येव मूर्तिः
स पटुरिव रसोऽयं विग्रही वीरनामा ।
दधदिव जयलक्ष्मीं संनिधौ चापवल्ली-
मगणितकुरुराजः कोऽयमेकोऽभ्युपैति ॥ २९ ॥

(उभौ शृणुतः ।)

**कुमारः**—आयुष्मन्, कस्येदमुदारं वचनम् ? ।

**नायकः**—अस्मत्प्रथमगुरोः शारद्वतस्य ।

(पुनर्नेपथ्ये ।)

द्वन्द्वाहवाराधितशूलपाणिः स पाण्डवः खाण्डवतर्पिताग्निः ।
ज्याघातजातः किणसंनिवेशः करद्वये यस्य परस्य पुंसः ॥ ३० ॥

अपि च,

गलितनिखिलशस्त्रं बाहुमात्रावशेषं
द्विगुणिततररागं यं निरीक्ष्य स्मरारिः ।
विहितकपटरूपः साहसाकृष्टचेता
नयनमभिललाटं दर्शयामास सद्यः ॥ ३१ ॥

व्यक्त एवायमर्जुनः । तथा हि—

हेलोल्लङ्घितवारिधिर्जनकजाविश्लेषशुष्यन्मनः-
कौशल्यासुतदैन्यपानसुपटुर्ग्रस्तांशुमन्मण्डलः ।
निर्दग्धाखिलराक्षसेश्वरपुरः सौमित्रिसंजीवन-
प्रोत्खातौषधिपर्वतोऽस्य मरुतः पुत्रो ध्वजे वर्तते ॥३२॥

(उभौ शृणुतः ।)

**कुमारः**—आयुष्मन्,

कृतवीररसोद्रेकैर्वैदर्भीगर्भितैः पदैः ।
त्वयि पुत्र इवात्यर्थं पक्षपातं व्यनक्ति कः ? ॥ ३३ ॥

**नायकः**—कुमार, किमित्युच्यते पुत्र इवेति । ननु पुत्र एवाहमाचार्यस्य ।

(नेपथ्ये ।)

तूर्णं कर्ण धनुर्गृहाण समरे शारद्वतस्त्वग्रणी-
र्भारद्वाज भृगूद्वहादधिगतान्यस्त्राणि संशिक्षय ।
द्रौणे नन्दय कौरवक्षितिपतिं पुत्रस्तथा शान्तनोः
संधत्ते समरोचितं पुररिपोः शिष्योऽयमास्तेऽग्रतः ॥३४॥

**नायकः**—(सानन्दम् ।) सोऽयं कुरुराजः सेनायां संनाहयति योधान् ।

**कुमारः**—देव, सारथिना परबलयोधाः स्वरूपतो वीर्यतश्च ज्ञातव्याः ।

**नायकः**—पश्यैनं भुजगध्वजावेदितकौटिल्यम् ।

यस्येन्दुवंशकलहप्रथमाङ्कुरस्य
सौजन्यगन्धमपि यस्य न वेत्ति चेतः ।
आ जन्मनो विषजलाग्निमुखैरुपायै-
रस्मन्निकारनिरतः कुरुराज एषः ॥ ३५ ॥

**कुमारः**—कोऽयं ततो दक्षिणतः ? ।

**नायकः**—(साश्चर्यम् ।)

रोषोत्कर्षकषायितोल्बणदृशोऽप्यग्रे हिडिम्बद्विषः
पाञ्चालीहृदयस्थलात्सरभसं लज्जादुकूलाञ्चलः ।
निर्मोकः फणिनस्तनोरिव बलाद्येनावकृष्टः पुरा
सोऽयं साहसिकाग्रणीस्तनुरथे दुःशासनस्तिष्ठति ॥ ३६ ॥

**कुमारः**—किमतः परं साहसम् ! ।

**नायकः**—इतः पश्य । (सप्रणामम् ।)

प्रतिफलितरविप्रभावितानः स्फुरदुरुकाञ्चनवेदिसूचितेज्यः ।
दधदुपनिषदः श्रियं समग्रां प्रथितयशा गुरुरेष कौरवाणाम् ॥ ३७ ॥

**कुमारः**—महानुभावः खल्वेष लक्ष्यते ।

**नायकः**—इतः पश्य ।

योऽयं ललाटतटमण्डितचण्डचूडः
संलक्ष्यते स्वयमिव त्रिपुरप्रमाथी ।
मूर्तोऽस्त्रवेद इव दुर्विषहः परेषां
पुत्रो गुरोः पुनरयं दयितः सखा मे ॥ ३८ ॥

**कुमारः**—पुनरावेदय ।

**नायकः**—

येनोच्चैर्ध्वजमिषतः कलश इवारोपितो धनुर्वेदः।
कनककमण्डलुमण्डितरथवंशो भाति गुरुरेषः ॥ ३९ ॥

**कुमारः**—कोऽयं कुरुराजसंनिधौ समरार्थीव दृश्यते ?।

**नायकः**—(सामर्षम्।)

मूलं सुयोधनकृताखिलदुर्नयानां
यद्दोर्बलं भृगुकुलोद्वहगूढशिष्यः।
सोऽयं प्रसन्नबलसूदनदत्तशक्तिः
सूतात्मजो निजकुलानुचिताभिमानः ॥ ४० ॥

**कुमारः**—(सोपहासम्।) नन्वेष घोषयात्रायां विदितप्रभावः। क एष ध्वजः?।

**नायकः**—(सप्रणामम्।)

अन्याङ्गनापरिहृतिप्रणयेन कीर्ते-
र्वालिङ्गितो धवलया पलितच्छलेन।
द्वन्द्वाहवप्रकटनिर्जितजामदग्न्यो
देवव्रतः पृथुयशाः स पितामहो नः ॥ ४१ ॥

सूत, त्वरय त्वरय तुरगान्।

(नेपथ्ये।)

वैमानिका इमे व्योम्नि समरालोकनोत्सुकाः।
बाहुसारमिदानीं त्वं प्रदर्शय धनंजय ॥ ४२ ॥

(ततः प्रविशति विद्याधरसहित इन्द्रः प्रतीहारी च।)

**इन्द्रः**—(साश्चर्यम्।)

वाक्कलहोऽपि सुगहनो बहुभिर्बलिनो विहीनसामर्थ्यैः ।
किमुतानेकैर्बलिभिः क्रूरास्त्रनिपातदारुणः समरः ॥ ४३ ॥

(पुनः सविस्मयम् ।)

एको रथी प्रतिरथास्तु निरस्तसंख्याः
कर्णादयः सुचिरराज्यमदेन दृप्ताः ।
वत्सस्तथाप्यहह निग्रहणं प्रविष्टः
सत्त्वं हि नोर्जिततरं विमृशत्यपायम् ॥ ४४ ॥

**कुमारः**—(पुरोऽवलोक्य ।) देव, कुरुपतिरेवागच्छति ।

**नायकः**—पूर्णास्तर्हि मनोरथाः ।

(ततः प्रविशति रथारूढो दुर्योधनः ।)

**दुर्योधनः**—(नायकं विलोक्य सामर्षम् ।)

वनवासपरिक्लेशात्किं निर्विण्णोऽसि जीवने ।
यदभीरेक एव त्वमनेकैर्योद्धुमुद्यतः ॥ ४५ ॥

**नायकः**—(सोपहासम् ।)

एको निवातकवचान्सह कालकेयै-
र्भस्मीचकार भगिनीमहरच्च शौरेः ।
एकेन खाण्डववनं जुहुवेऽनले च
पार्थस्य नाभिनव एष रणेषु पन्थाः ॥ ४६ ॥

**दुर्योधनः**—अलमेतैरुपहासैः । उपस्थितो निकषोपलोपमः संग्रामः ।

**नायकः**—(सहासम् ।)

अपसर कुरुनाथ द्यूतमन्यादृशं त-
द्द्रुपदनृपतिपुत्री यत्र दासीकृतासीत् ।

इह हि शरशलाकापातपूर्वं सगर्वं
प्रतिनृपतिशराक्षैः क्षत्रियद्यूतकेलिः ॥ ४७ ॥

**दुर्योधनः**—(सामर्षम् ।)

करिवदनवलयभूषितकरश्चिरत्यक्तकार्मुकाभ्यासः ।
नर्तनशालां प्रविश प्रवीरपुरुषोचितो हि सङ्ग्रामः ॥ ४८ ॥

**कुमारः**—(सोल्लुण्ठम् ।) आर्य, एनं चिरपरित्यक्तकार्मुकाभ्यास इत्यभिधत्से तद्युक्तम् ।

संक्रन्दनप्रहितखेचरवर्गबद्ध-
युष्मत्कृपाकुलनिजाग्रजशासनेन ।
भीमानुजेन विहिता शरपञ्जरश्री-
र्नालोकिता हि भवता नृप विह्वलेन ॥ ४९ ॥

**विद्याधरः**—देव, प्रौढः खल्वेष वत्सः ।

**इन्द्रः**—राजपुत्रो ह्ययम् ।

**दुर्योधनः**—सूत, अलं विप्रजनोचितवाक्कलहेन । विषमेयं भूमिः । रथसंचारोचितां भुवमवतराम ।

**सूतः**—यदभिरुचितं कुरुपतये ।

(इति निष्क्रान्तौ ।)

**विद्याधरः**—(नायकरथं निर्दिश्य ।) देव,

त्वन्नन्दनस्यन्दनवाजिराजिक्षुरक्षतक्षुण्णरजःपताकाः ।
विपक्षवक्षोऽरणिमन्थनोत्थप्रतापवह्नेरिव धूमलेखाः ॥ ५० ॥

**इन्द्रः**—भद्र, महाकविरसि ।

**विद्याधरः**—देव, निकटगते किरीटिनि प्रवृत्तः कोलाहलः कुरूणाम् । तथा हि—

हेषाघोषैर्हरीणां जितघननिनदैर्बृंहितैः कुञ्जराणां
ज्याघातोत्थैर्निनादैः पटुपटहरवैर्मर्दलोद्दामशब्दैः ।
प्राप्तैः कर्णोपकण्ठं मदगजनिवहस्कन्धघण्टाप्रणादैः
शृङ्गाराय त्वरन्ते त्रिदशमृगदृशो वीरवर्गानुरक्ताः ॥ ५१ ॥

**प्रतीहारी**—देव, ण कोलाहलमेत्तं । जण्णं वि पउत्तं । कुरुबलं पच्चहिआतस्स तुह उत्तस्स अहिमुहं प्रचलिदं । देव, पेक्ख । आकण्णाकट्टिअकठिणफग्गुणकोदंडमुहणिस्सरंतसरणिअरेहिं केवि खंडिदगत्ताओ, केवि भग्गकोदंडाओ, केवि पमुडिदसीसकाओ, केवि णिब्भिण्णणेत्ताओ, केवि भग्गभुजाओ, केवि विक्खदवक्खत्थलाओ कुरुबले भटा दीसंति । (क)

**इन्द्रः**—(सहर्षम् ।) कृतहस्तः खल्वेष वत्सः ।

**विद्याधरः**—देव, पश्य पश्य,

मुञ्चद्भिर्मदवारि वारणगणैर्मेघायितं कार्मुके-
रेतैः शक्रशरासनायितमधश्छत्रैः शिलीन्ध्रायितम् ।
खद्योतायितमस्त्रघट्टनसमुद्भूतस्फुलिङ्गैः स्फुर-
न्नाराचैरशनायितं रणभुवा सैन्यैर्नभस्यायितम् ॥ ५२ ॥

अपि च,

---

(क) देव, न कोलाहलमात्रम् । जन्यमपि प्रवृत्तम् । कुरुबलं प्रत्यभियातस्य तव पुत्रस्याभिमुखं प्रचलितम् । देव, प्रेक्षस्व । आकर्णाकृष्टकठिनफाल्गुनकोदण्डमुखनिःसरच्छरनिकरैः केऽपि खण्डितगात्राः, केऽपि भग्नकोदण्डाः, केऽपि प्रमोटितशीर्षकाः, केऽपि निर्भिन्ननेत्राः, केऽपि भग्नभुजाः, केऽपि विक्षतवक्षःस्थलाः कुरुबले भटा दृश्यन्ते ।

त्वत्पुत्रमुक्तविशिखैरशनिप्रकाशै-
रामूललूननवकेतककान्तदन्ताः ।
त्रासावसन्नमदधारकपोलभागाः
संपादयन्ति करिणः करिणीभ्रमं नः ॥ ५३ ॥

**इन्द्रः**—(सतोषम् ।)

हरान्तेवासिनस्तस्य कालकेयान्तकस्य च ।
यदुनाथसनाथस्य का श्लाघा कौरवैर्जितैः ॥ ५४ ॥

**प्रतीहारी**—पेक्खदु देवो ।

बाणप्पलूणमअवारणगेरगेर-
णाणासिराहिमुहदत्तगहीरतुंडा ।
एसा पणच्चिदकरांगुलि कंठदिद्धं
रत्तासअं पिबइ का वि पिसाअकण्णा ॥ ५५ ॥ (क)

**विद्याधरः**—देव, पश्य,

एते मत्तमतङ्गजाः प्रजविनः श्वासाकुलाधोरणाः
स्फूर्जच्चन्द्रविबर्हभारकलितोद्दण्डध्वजश्रेणयः ।
कुप्यत्त्वत्करवज्रपातचकितप्रभ्रान्तपृथ्वीधर-
व्यूहभ्रान्तिमुदञ्चयन्ति नितरां त्वत्पुत्रविद्राविताः ॥ ५६ ॥

---

(क) प्रेक्षतां देवः ।

बाणप्रलूनमदवारणग्रन्थिग्रन्थि-
नानाशिराभिमुखदत्तगभीरतुण्डा ।
एषा प्रणर्तितकराङ्गुलि कण्ठदिग्धं
रक्तासवं पिबति कापि पिशाचकन्या ॥

(इन्द्रः सहर्षं पश्यति ।)

**प्रतीहारी**—देव, पेक्ख पेक्ख । णिरंतरविक्खित्तबाणणिउरंबपरिक्खदगअणररुहिरपाणसंतप्पिदाओ साहुवादोत्तरं जादुहाणजोइणीओ अहिणंदंति तुह उत्तस्स विअअं । (क)

**इन्द्रः**—जय एव तर्हि । सत्याशिषस्ताः ! ।

**विद्याधरः**—(विभाव्य ।) देव, महद्युद्धं वर्तते । पश्य पश्य,

वपुषि भटकरोटिन्यस्तकीलालसिन्धुं
द्विरदकरमृणालैर्योगिनीभिर्निपीय ।
समरविजयिने यद्बाहुमुद्यम्य भूयः
प्रकटितपरितोषं स्वस्तिवादोऽभितेने ॥ ५७ ॥

अपि च,

भुग्नभ्रूयुगलैः क्रुधा समधिकस्फारारुणाक्षैः क्षणा-
त्स्वेदाम्भःपटलप्रमृष्टतिलकैर्दष्टाधरोष्ठैरपि ।
दृष्टश्मश्रुभिरुत्पतद्भिरभितः संकीर्णमालक्ष्यते
त्वत्पुत्रास्त्रनिकृत्तवैरिसुभटश्रेणीशिरोभिर्वियत् ॥ ५८ ॥

(पुनः सविस्मयमालोक्य ।) देव, पश्य,

कोऽप्येष खण्डितशिरा विकसन्मुखश्रीः
प्रारब्धताण्डवविधिः सुरकामिनीभिः ।
आलोक्यते निजकराभिनयानुरूप-
व्यापारितेक्षणनिवेदितसत्त्वसारः ॥ ५९ ॥

---

(क) देव, प्रेक्षस्व प्रेक्षस्व । निरन्तरविक्षिप्तबाणनिकुरम्बपरिक्षतगजनररुधिरपानसंतर्पिताः साधुवादोत्तरं यातुधानयोगिन्योऽभिनन्दन्ति तव पुत्रस्य विजयम् ।

**इन्द्रः**—(सहर्षम् ।) किं किं पश्यामि, दोलायितं मनः ! ।

मायाविभिः कुरुबलैः सह युध्यमानं
कुन्तीसुतं रणशिरस्यसहायवीरम् ।
तद्वैरिवीरवरणेषु तथात्र नूनं
सापत्न्यसंभ्रमकलिं सुरकामिनीनाम् ॥ ६० ॥

**विद्याधरः**—एवमेतत् । (अन्यतोऽवलोक्य ।) देव, पश्य पश्य,

दूरात्प्रोत्सार्यमाणापरशरनिकरज्वालकीलाभिघात-
प्रभ्रश्यद्वाजिवर्गभ्रमणनियमनव्याकुलब्रध्नसूतः ।
लेढि प्रौढो हुताशः कृतलयसमयाशङ्कमाकाशवीथिं
गङ्गासूनुप्रमुक्तप्रथितहुतवहास्त्रानुभावप्रसूतः ॥ ६१ ॥

**प्रतीहारी**—देव, अम्हाणं वि णिअडवत्ती भआणओ एसो हुदासणो । (क)

**विद्याधरः**—भद्रे, मा भैषीः । किं नामेदं किरीटिनः । पश्य पश्य,

नीलैः कालाञ्जननिभतमःस्तोमलिप्तान्तरिक्षै-
र्विद्युद्दामद्युतिधवलिताशेषदिक्चक्रवालैः ।
धीरध्वानैः कलभकनिभैः स्थूलधाराः सृजद्भि-
र्मेघैर्नीतः प्रलयमनलो वारुणास्त्रप्रसूतैः ॥ ६२ ॥

**इन्द्रः**—महानुभावः खल्वेष वत्सः ।

**प्रतीहारी**—देव, संपदं राहासुदेण भुजंगमत्थं पउत्तं । आलोलजीहाजुअलकरालमहणीसरंतगरलधूमलेहाकरंबिदफणारअणकिरणमाला-

---

(क) देव, अस्माकमपि निकटवर्ती भयानक एष हुताशनः ।

विडंबिदसुरकोअंडाओ विहलिदसअलपुहवीवलआओ पेक्खणमेत्त-दग्धमहामहीरुहाओ अपसरंति सप्पाओ । (क)

**विद्याधरः**—

दीर्घैः सज्जनसख्यवन्मुकुलितैश्चित्तैः खलानामिव
व्यालैर्योगिजनैरिवाम्बरतलव्याप्तैर्लसत्स्वस्तिकैः ।
रत्नोद्भासिकरोज्ज्वलैर्नृपतिवत्स्वर्गस्थवद्भोगिभी
राधेयास्त्रभुजङ्गमास्त्रजनितैर्दिक्चक्रमाक्रम्यते ॥ ६३ ॥

**इन्द्रः**—खाण्डवदाहे कृतवैराः किं दशन्ति सर्पाः ।

**विद्याधरः**—अलं विषादेन । अर्जुनेन प्रयुक्तं गारुडमस्त्रम् । पश्य पश्य,

पादाघातनिपातमारुतभरात्प्रोत्क्षिप्तपृथ्वीधरा-
श्चञ्चूदष्टविशालभोगभुजगाः सूर्योपकण्ठस्पृशः ।
संतोषं जनयन्त्यमी कुलगुरोस्तीक्ष्णस्तथा सारथे-
र्मन्ये वैरिनृपप्रमाथविकसद्विक्रान्तयः पक्षिणः ॥ ६४ ॥

**इन्द्रः**—(सहर्षम् ।) ततस्ततः ।

**प्रतीहारी**—एसो संपदं दुज्जोधणभच्छिदेण दोणेण मुत्तो वारण-बाणो तुह उत्तस्स समुपचलिदो । (ख)

---

(क) देव, सांप्रतं राधासुतेन भुजङ्गमास्त्रं प्रयुक्तम् । आलोलजिह्वायुगलकरालमुखनिःसरद्गरलधूमलेखाकरम्बितफणारत्नकिरणमालाविडम्बितसुरकोदण्डा विहलितसकलपृथिवीवलयाः प्रेक्षणमात्रदग्धमहामहीरुहा अपसरन्ति सर्पाः ।

(ख) एष सांप्रतं दुर्योधनभर्त्सितेन द्रोणेन मुक्तो वारणबाणस्तव पुत्रस्य समुपचलितः ।

**विद्याधरः**—(सम्यगवलोक्य ।) प्रयुक्तं वैनायकमस्त्रम् । पश्य पश्य,

सिन्दूरारुणमौलिभिः स्वदशनप्रोताम्बुदश्रेणिभि-
र्लीलोदस्तकराग्रमारुतभरप्रोद्धूततारागणैः ।
पादाघातचलत्कुलक्षितिधरैः संकीर्णमालक्ष्यते
हैरम्बास्त्रविनिःसृतैर्मदमुखैः स्तम्बेरमैरम्बरम् ॥ ६५ ॥

**इन्द्रः**—ततस्ततः ।

**विद्याधरः**—पार्थेन सिंहास्त्रं प्रयुक्तम् । पश्य पश्य,

दंष्ट्राज्योतिःखचितगगनैः केसराटोपभीमै-
रुल्लाङ्गूलैः क्षितिधरगुहासंचरद्धीरनादैः ।
सिंहैरन्तर्नखरशिखरोत्खातकुम्भस्थलासृ-
ग्धारास्वादव्यसनविवशैः क्वापि नीता गजेन्द्राः ॥ ६६ ॥

**इन्द्रः**—स्वल्पावशिष्टस्तर्हि जयः ।

**विद्याधरः**—देव, नैव । निरवशिष्टश्च ।

हत्वा शान्तनुनन्दनस्य तुरगान्सूतं कुरूणां गुरोः
कर्णस्यापि रथं विदार्य कणशः कृत्वा विसंज्ञं कृपम् ।
छित्त्वा द्रोणसुतस्य कार्मुकलतां विद्राव्य चान्यद्बलं
त्वत्पुत्रो भयविद्रवत्कुरुपतेः पन्थानमन्वेत्ययम् ॥ ६७ ॥

**प्रतीहारी**—अच्चाहिदं दुज्जोधणस्स । (क)

**विद्याधरः**—नैव ।

विमुखे निपतति शस्त्रं संक्रन्दननन्दनस्य न हि जातु ।
मणिमयमुकुटनिपातात्कोपाग्निस्तस्य कोपितः किंचित् ॥६८॥

---

(क) अत्याहितं दुर्योधनस्य ।

(नेपथ्ये ।)

भो भो राधेयमित्र,

राजात्मजापरिभवक्षुभितः प्रतिज्ञा-
मार्यस्तवोरुदलने यदि नाकरिष्यत् ।
नूनं स्फुरन्मुकुटपाटनपाटवेन
तीक्ष्णः शरस्तव शिरोऽप्यहरिष्यदेव ॥ ६९ ॥

**प्रतीहारी**—देव, सुदं तुह उत्तस्स वअणं । (क)

**इन्द्रः**—(सविस्मयम् ।)

दैवानुकूल्ये किं नाम न शिवाय प्रकल्पते ।
क्रुद्धभीमप्रतिज्ञापि ररक्ष कुरुभूपतिम् ॥ ७० ॥

**विद्याधरः**—देव, दुर्योधनमुकुटपाटनक्षुभितैः कर्णपुरःसरैः कुरुभिः समन्ततो वेष्टितोऽर्जुनः ।

**इन्द्रः**—(साशङ्कम् ।) ततस्ततः ।

**विद्याधरः**—देव, त्वत्पुत्रेण प्रस्वापनास्त्रं प्रयुक्तम् ।

आमीलितेक्षणयुगं प्रथमं प्रसर्प-
न्निःश्वासवातभरपूरितकण्ठघोषम् ।
गण्डस्थलानिहितकार्मुककोटि सुप्तं
संलक्ष्यते कुरुबलं मृतकल्पमेतत् ॥ ७१ ॥

**इन्द्रः**—आयोधनश्रान्तानामुचितमेतत् । ततस्ततः ।

**विद्याधरः**—

एकं शान्तनवं हित्वा सर्वे विवसनाः कृताः ।
प्रमृज्य लोचने पश्चात्प्रबुद्धाश्च पलायिताः ॥ ७२ ॥

---

(क) देव, श्रुतं पुत्रस्य वचनम् ।

अपि च,

निर्जित्य कौरवबलान्यथ बल्लवेभ्यो
गास्ताः समर्प्य मुदितैरभिनन्दितस्तैः ।
प्रत्युद्गतः पुरजनैरथ धूलिजाल-
व्यालोलसक्तनयनैरयमेति पार्थः ॥ ७३ ॥

इन्द्रः—(आलोक्य ।) यद्द्रष्टव्यं तद्दृष्टम् ।

(ततः प्रविशति रथारूढो नायकः सूतश्च ।)

नायकः—(सूतं विलोक्य ।) कुमार,

न तथा मोदते चित्तं जित्वा कुरुपतिं रणे ।
यथाक्षतशरीरेण त्वया मत्स्येन्द्रनन्दन ॥ ७४ ॥

सूतः—त्वयि रक्षितरि किं दुर्लभम् ! ।

इन्द्रः—(सरभसम् ।) दृष्टद्रष्टव्योऽस्म्यहम् । (इति निष्क्रान्तः ।)

नायकः—(सतोषम् ।) सूत,

दुःशासनो यदकरोत्कुरुसंनिधाने
पञ्चालराजतनयां प्रसहन्विवस्त्राम् ।
तत्सांप्रतं प्रतिकृतं हरता मयात्र
निद्राणकौरवबलस्य रणेंऽशुकानि ॥ ७५ ॥

सूतः—सर्वमेतत्प्रतिकृतम् । तावच्च—

संग्राममरणं नाम क्षतदुःखं सुखोत्तरम् ।
आजन्म हृदये शल्यं मानभङ्गो हि मानिनाम् ॥ ७६ ॥

नायकः—(पुरोऽवलोक्य ।) अये सोपकरणानुज आर्य, आर्यश्च विराट इत एवागच्छति ।

(ततः प्रविशन्ति यथानिर्दिष्टा युधिष्ठिरभीमनकुलसहदेवाः सपरिवारो विराटश्च ।)

**युधिष्ठिरः**—मत्स्यराज, पश्य पश्य,

रथतुरगरजोभिर्धूसरश्मश्रुजालं
श्रमजलकणिकाभिर्भासुराभिः परीतम् ।
असमसमरकर्माक्रान्तमप्यस्य वक्रं
जयति विजयलक्ष्मीसङ्गसंपत्सुशोभम् ॥ ७७ ॥

**विराटः**—

शोभन्ते विद्यया विप्राः क्षत्रिया विजयाश्रिया ।
श्रियोऽनुकूलदानेन लज्जया कुलपालिकाः ॥ ७८ ॥

**नायकः**—(ससंभ्रमम् ।) अये, कथमार्यः ! । (रथादवतीर्य यथोचितमभिवादयते ।)

**सर्वे**—(अभिनन्दन्ति ।)

एकोऽहरद्रिपुपुराणि हरः खरादी-
नेकश्च दण्डकवने न्यवधीत्स रामः ।
एकोऽधुना कुरुबलानि भवानजैषी-
न्नाश्रावि नैक्षि च पुनः पुरुषश्चतुर्थः ॥ ७९ ॥

**नायकः**—स खलु युष्माकं प्रसादः ! ।

**विराटः**—(नेपथ्याभिमुखमवलोक्य ।) राजपुत्र, पश्य पश्य,

वत्सालोकप्रस्नुतापीनभाजः सिञ्चन्त्यः क्ष्मां क्षीरधाराच्छलेन ।
चन्द्रालोकस्पर्धिनीं धेनवस्ते कीर्तिं मूर्तां नूनमेताः सृजन्ति ॥८०॥

(अर्जुनं संबोध्य ।)

मध्येसभं यो द्रुपदात्मजायाश्चकर्ष केशान्धृतराष्ट्रपुत्रः ।
निर्यात्यमेतन्मुकुटं निपात्य निर्यातितं तस्य सुयोधनस्य ॥ ८१ ॥

(तच्छ्रुत्वा ।)

**भीमः**—(सामर्शम् ।) भो भो राजन्, नैतत्प्रतिकृतं भवति । किंतु,

दुःशासनस्य गदया प्रविदार्य वक्षः
सद्यः कदुष्णरुधिराणि ततो निपीय ।
तच्छोणिताम्बुलुलितां सुनियम्य देव्या
वेणीं तु तत्प्रतिकरिष्यति भीम एव ॥ ८२ ॥

**युधिष्ठिरः**—वत्स, किमसाध्यं त्वया ! ।

लीलोन्मूलितकौबेरसौगन्धिकवनश्रियः ।
लीलाहतहिडिम्बस्य विक्रमं ते रुणद्धि कः ॥ ८३ ॥

**भीमः**—(श्रुत्वा सानुनयम् ।) शृणोत्वार्यः । न क्षमेऽहम् ।

**युधिष्ठिरः**—अतीतः कालः क्षमायाः, आसन्नश्च कालो विक्रमस्य । अलमनुनयेन ।

**विराटः**—(युधिष्ठिरं प्रति ।)

अज्ञानतो नियुक्तश्च यदयोग्येषु कर्मसु ।
क्षन्तव्यं तन्महाभाग नाज्ञातमपराध्यति ॥ ८४ ॥

**नायकः**—राजन्, उपकार एवायम्, नापकारः ।

यदि कर्मस्वयोग्येषु त्वमस्मान्न न्ययोक्ष्यथाः ।
अज्ञातवासं राजायं नाकरिष्यत्सहानुजैः ॥ ८५ ॥

**विराटः**—(नायकं प्रति ।) राजपुत्र,

सख्यं साप्तपदीनं यत्सोढव्यः प्रणयो मम ।
अतस्त्वामर्थये किंचिदुत्तरा मे स्नुषास्तु ते ॥ ८६ ॥

**नायकः**—यद्रोचते भवते ।

स्वयमायान्तीं गेहे लक्ष्मीं को ना विमन्यते मूढः ।
दैवानुकूलता सा यदयाचितमाप्यतेऽभीष्टम् ॥ ८७

**विराटः**—किं ते भूयः प्रियमुपकरोमि ? ।

**नायकः**—

निस्तीर्णोऽज्ञातवासो रणभुवि विजिता धार्तराष्ट्राः सकर्णाः
स्त्रीरत्नं त्वत्तनूजा समजनि तनयस्याभिमन्योः कलत्रम् ।
गावः प्रत्याहृतास्ताः सुहृदपि परमस्त्वं च नः श्लाघनीय-
स्तज्जाने नैव किंचित्सुचिरमवमृशन्यन्मया प्रार्थनीयम् ॥ ८८ ॥

तथापीदमस्तु ।

सौजन्यामृतसिन्धवः परहितप्रारम्भवीरव्रता
वाचालाः परवर्णने निजगुणालापे च मौनव्रताः ।
आपत्स्वप्यविलुप्तधैर्यनिचयाः संपत्स्वनुत्सेकिनो
मा भूवन्खलवक्त्रनिर्गतविषम्लानाननाः सज्जनाः ॥ ८९ ॥

अपि च,

सारस्वतं स्फुरतु चेतसि सत्कवीनां
चक्षुर्भवन्तु कृतिनो गतमत्सराश्च ।
भूपाश्च सन्तु कविसूक्तिषु सानुरागाः
संत्यज्य मण्डलकविप्रणयानुरागम् ॥ ९० ॥

**विराटः**—तथास्तु ।

(इति निष्क्रान्ता सर्वे ।)

**इति श्रीकाञ्चनाचार्यविरचितो धनंजयविजयो**
**नाम व्यायोगः समाप्तः ।**